दिनांक 15-6-21 उपशास्त्री प्रथम वर्ष, विषय-व्याकरण

ग्रन्थ-सिद्धान्त कौमुदी, तद्धित प्रकरणम्

नैषध्यः — निषधानां देशविशेषाणां राजा इति विग्रहे निषध शब्दात् कुरुनादिभ्यो ण्यः इति सूत्रेण ण्य प्रत्यये अनुबन्धलोपे। तद्धितेष्वचामादेः इति वृद्धौ अन्त्यलोपे कृते नैषध्यः इतिसिद्धम्।

इक्ष्वाकवः — इक्ष्वाकूणां जनपदविशेषाणां राजानः इति विग्रहे जनपदशब्दात् अञ् इति सूत्रेण अञ् प्रत्यये अनुबन्धलोपे। तद्धितेष्वचामादेः इति सूत्रेण वृद्धौ, उकारस्य स्थाने ओर्गुणः इति सूत्रेण गुणे अवादेशे ऐक्ष्वाकव इति दशायां। ते तद्राजाः इति सूत्रेण तद्राज संज्ञायाम्, तद्राजस्य बहुषु तेनैवास्त्रियाम् इति सूत्रेण अञ् प्रत्ययस्य लोपे। एवंप्रकारेण आदिवृद्धि निषेधे (परिणाम स्वरूप इक्ष्वाकु शब्दादेव विभक्ति भवति प्रातिपदिक संज्ञायां विभक्ति कार्ये।

कम्बोजः — कम्बोजानां देशविशेषाणां राजा इति विग्रहे, जनपद शब्दात् क्षत्रियाद् अञ् इति सूत्रेण अञ् प्रत्यये अनुबन्ध लोपे। तद्धितेष्वचामादेः इति सूत्रेण वृद्धौ। काम्बोज इति दशायां कम्बोजात् लुक् इति सूत्रे अञ प्रत्ययस्य लोपे तस्मात् वृद्धि निषेधे, कम्बोज शब्दादेव विभक्ति भवति। प्रातिपदिक संज्ञायां विभक्ति कार्ये।

रागः — रज्यतेऽनेन इति विग्रहे रञ्ज् धातोः अकर्तरि च कारके संज्ञायाम् इति सूत्रेण घञ् प्रत्यये, घञि च भावकरणयोः इति नलोपे, चजोः कु घिण्ण्यतोः इति कुत्वे, उपधा वृद्धौ प्रातिपदिक संज्ञायाम् विभक्ति कार्ये रागः इतिसिद्धम्।

अमरनाथ मिश्र
एसो० प्रो० व्याकरण
रा० उ० सं० म० वि० दु...
पूर्णिया

दिनांक 15/6/21

उपशास्त्री द्वितीय वर्ष, विषय- व्याकरण
ग्रन्थ- सिद्धान्त कौमुदी, अदादि प्रकरणम्

1 आहतुः - ~~ब्रू~~ ब्रू धातोर्लट् लट् स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये अनुबन्ध लोपे। सार्वधातुक संज्ञायां शप् प्रत्यये, अदिप्रभृतिभ्यः शपः इति शपो लुक् तथा ब्रुवः पञ्चानामादित आहो ब्रुवः इति सूत्रेण तस् स्थाने अतुसादेशे तथा ब्रू स्थाने आह् आदेशे। आह् अतुस इति दशायां सकारस्य स्थाने रुत्वे विसर्गे।

2 आत्थ — ब्रू धातोर्लट् लट् स्थाने तिप्तस्झि इति सूत्रेण सिप् प्रत्यये, अनुबन्ध लोपे। सार्वधातुक संज्ञायां, शप् प्रत्यये, अदिप्रभृतिभ्यः शपः इति शपो लुक्, ब्रुवः पञ्चानामादित आहो ब्रुवः इति सूत्रेण सिप स्थाने थलादेशे तथा ब्रू स्थाने आह् आदेशे आह् थ इति दशायां आहस्थः इति सूत्रेण हकारस्य ~~स्थाने~~
स्थाने थकारः ~~आत्थ इति सिद्धम्~~। थकारस्य स्थाने चर्त्वे तकारः आत्थ इति सिद्धम्।

4 ब्रूते - ब्रू धातोर्लट्, लट् स्थाने तिप्तस्झि इति सूत्रेण त प्रत्यये, सार्वधातुक संज्ञायां, शप, अदिप्रभृतिभ्यः शपः इति शपो लुक्। टित आत्मनेपदानां टेरे इति एत्वे ब्रूते इति सिद्धम्।

5 उवाच - ब्रू धातोर्लिट् लिट् ~~स्थाने~~ तिप्तस्झि इति सूत्रेण तिप् प्रत्यये, परस्मैपदानां णल --- इति सूत्रेण तिप् स्थाने णल् ~~प~~ आदेशे अनुबन्ध लोपे, ब्रुवो वचिः इति सूत्रेण ब्रू स्थाने वच् आदेशे, वच् अ इति जाते। लिटि धातोरनभ्यासस्य इति द्वित्वे अभ्यास संज्ञायां हलादिः शेषे, लिट्यभ्यासस्योभयेषाम् इति सूत्रेण अभ्यास वकारस्य स्थाने संप्रसारणे उकारः अत उपधायाः इति वृद्धौ उवाच इति सिद्धम्।

अमरनाथ मिश्र
एसो० प्रो० व्याकरण
रा० उ० सं० म० वि० सुलबेना
पूर्णिया

दि० 7.15.21
15-7-21

शास्त्री तृतीय खण्ड, विषय- व्याकरण

ग्रन्थ- परमलघुमञ्जूषा

प्रश्न — नैयायिकमीमांसकमतं लिखित्वा लक्षणाप्रवृत्तिविषयकं मञ्जूषाकारमतं लिखितव्यताम्। अथवा लक्षणा कः पदार्थः

उत्तर — स्वशक्यसम्बन्धो लक्षणा। सा च द्विधा - गौणी शुद्धा च। स्वनिरूपितसादृश्याधिकरणत्व सम्बन्धेन शक्यसम्बन्धप्रतिपादिका शुद्धा। प्रकारान्तरेणाऽपि सा द्विविधा - अजहत्स्वार्था जहत्स्वार्था च। स्वार्थसम्वलितपरार्थविधायिका ऽजहत्स्वार्था। तेन छत्रिणो यान्ति, कुन्ताः प्रविशन्ति, यष्टीः प्रवेशय, काकेभ्यो दधि रक्ष्यताम् इत्यादौ छत्रसहितसेना कुन्तास्त्रसहित पुरुषः यष्टिसहित पुरुष काकसहित सर्व दध्युपघातकबोधः।

स्वार्थपरित्यागेनेतरार्थाभिधायिका ऽजहत्स्वार्था। तत्परित्यागश्च शक्यार्थस्य लक्ष्यार्थान्वयित्वम्। तेन गां वाहिकं पाययेत्यादौ गोशब्दस्य लक्षणायामपि न गोस्तदन्वयि पानक्रियान्वयित्व। सा च लक्षणा तात्स्थ्यादिनिमित्तिका। तात्स्थ्यात्तथैव तद्धर्म्यात् तत्सामीप्यात्तथैव च, तत्साहचर्यात् तादर्थ्याज्ज्ञेया वै लक्षणा बुधैः। ~~[illegible]~~ तात्स्थ्यात् मञ्चा हसन्ति, ग्रामः पलायितः। तद्धर्म्यात् सिंहो ~~[illegible]~~ माणवकः, गौर्वाहिकः। तत्सामीप्यात् गङ्गायां घोषः। तत्साहचर्यात् यष्टीः प्रवेशय। तादर्थ्यात् इन्द्रार्था स्थूणा इन्द्रः।

अन्वयाद्यनुपपत्तिप्रतिसन्धानञ्च लक्षणाबीजम्।

वस्तुतस्तु तात्पर्यानुपपत्तिप्रतिसंधानमेव तद्बीजम्। अन्यथा गङ्गायां घोष इत्यादौ घोषादिपद एव मत्स्यादिलक्षणापत्तिः स्यात् तत्राप्यन्वयानुपपत्तिपरिहारात्। गङ्गायां पापी गच्छति इत्यादौ गङ्गापदे नरके लक्षणापत्तिश्च। अस्माकं तु भूतपूर्वपापावच्छिन्नलक्षकत्वे तात्पर्यान्नदे नरकं दृष्ट्वा वाच्यं निरस्येत इत्यत्रान्वयसम्भवेऽपि तात्पर्यानुपपत्त्यैव लक्षणा स्वीकारात्। एकानुगमन स्वीकारेण निर्वाहे नानानुगमनस्वीकारे गौरवाच्च।

अमरनाथमिश्र (एकोत्तर)
शा० तृ० सं० मं० लि० मुसहरी
(राणीपा)